आदिवराहः, पुं, (आदिः कारणं स च वराहश्चेति कर्म्मधारयः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ आदिशूकरः । आद्यक्रोडः ॥

आदिष्टं, क्ली, (आङ् + दिश् + क्तः ।) उच्छिष्टं । इति मेदिनी ॥

आदिष्टः, त्रि, (आङ् + दिश् + क्त ।) आदेशितः । आज्ञप्तः इति मेदिनी । (नियोजितः, उपदिष्टः, अनुशासितः, अभिहितः ।)

आदीनवः, पुं, (दीङ् क्षये भावे क्तः । स्वादय ओदितः, ओदितश्चेति नत्वं । आदीनस्य वा नम् । प्रज्ञाद्यर्थे अ इति वाञ्छकात् वातेः कः ।) क्लेशः । इत्यमरः ॥ दोषः । दुरन्तः । इति मेदिनी ॥ (यथा, शिशुपालवधे २ । २२ ।
"यदासुदेवेनादीनमनादीनवमीरितं" ।)

आदीपनं, क्ली, (आदीप्यते आङ् + दीप् + भावे ल्युट् ।) आलिम्पना । इति त्रिकाण्डशेषः ॥ आलिपना इति भाषा ।

आदृतः, त्रि, (आङ् + दृङ् + आद्रियते यः कर्म्मणि क्तः ।) कृतादरः । सादरः । अर्चितः । पूजितः । इत्यमरः ॥ (सावधानः, अवहितः, अप्रमत्तः । यथा, मत्स्यतन्त्रे,
"आत्मागमादृतो रक्षेत्प्रमादाद्धि विनश्यति" ।)

आदृत्यः, त्रि, (आङ् + दृ + क्यप् ।) आदरणीयः । आदरयोग्यः ॥

आदेशः, पुं, (आङ् + दिश् + भावे घञ् ।) आज्ञा । इति हेमचन्द्रः ॥ ज्योतिःशास्त्रफलं । इति सिद्धान्तशिरोमणिः ॥ वर्णस्य वर्णान्तरोत्पत्तिः । प्रकृतिप्रत्ययोपघातिकार्य्यं । इति व्याकरणं । (अनुमतिः, शासनं, उपदेशः, शास्त्राचार्य्योपदेशगम्यो वार्त्ताव्यापारः, कार्य्यभेदः, यथा मुग्धबोधे "स्थानिवदादेशः" । यथा, मनुः, ८ । २५८ ।
"मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह" ।)

आदेशी, [न्] पुं, (आङ् + दिश् + णिनि ।) दैवज्ञः । गणकः । इति हेमचन्द्रः ॥ (त्रि, आदेशकर्त्ता, उपदेष्टा, यथा, रघुवंशे, ४ । ६८ ।
"कपोलपाटलादेशि बभूव रघुचेष्टितं" ॥)

आदेष्टा, [ऋ] पुं, (आदिशति ऋत्विजादीन् यागादिविषयसम्पादनाय प्रेरयति । आङ् + दिश अतिसर्ज्जने + तृच् ।) यागविषये ममेष्टसम्पादनाय यथार्थं कर्म्म कुर्व्विति ऋत्विजामादेशकः । तत्पर्य्यायः व्रती २ यष्टा ३ यजमानः ४ । इत्यमरः ॥ अभ्यादेष्टा ५ याजकः ६ । इति हेमचन्द्रः ॥ आदेशकर्त्ता ॥

आद्यं, क्ली, (अद्यते यत् अद् कर्म्मणि ण्यत् ।) धान्यं । इति राजनिर्घण्टः ॥ अदनीयद्रव्ये त्रि ॥ (यथा— मनुः, ५ । २४ ।
"तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यद्भवेत् ।
चिरस्थितमपित्वाद्यं"—इत्यादि ।)

आद्यः, त्रि, (आदौ भवः दिगादिभ्यो यत् यद्वा अद्यते यः अद् कर्म्मणि ण्यत् ।) प्रथमः । इत्यमरः ॥ (यथा महाभारते,—
"तोषितोऽहं नृपश्रेष्ठ त्वयैवाद्येन कर्म्मणा" ।
रघुवंशे, १ । ११ ।
"आसीत् महीक्षितामाद्यः प्रणवश्छन्दसामिव" ।)
भक्ष्यः । यथा मनुः ५ । २६ ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः" ।

आद्यकविः, पुं, (आद्यश्च कविश्चेति कर्म्मधारयः ।) वाल्मीकिमुनिः । इति भूरिप्रयोगः । (पुराणकविः ब्रह्मा) ।

आद्यमाषकः, पुं, (आद्य + मष् + हलश्चेति घञ् + कः ।) माषकपरिमाणं । पञ्चरक्तिकाः । इत्यमरः ॥ यथाह भास्कराचार्य्यः,—
"दशार्द्धगुञ्जं प्रवदन्ति माषं" ।)

आद्यबीजं, क्ली, (आद्यं मुख्यं बीजं कारणं ।) आदिकारणं । इति जटाधरः ॥

आद्या, स्त्री, (आदौ भवा दिगादित्वात् यत् टाप् ।) दुर्गा । इति शब्दरत्नावली । काली । तारा । त्रिपुरसुन्दरी । भुवनेश्वरी । इति तन्त्रसारनीलतन्त्रयोगिनीतन्त्राणि । प्रधाना शक्तिः । महाविद्या । यथा, मुण्डमालातन्त्रे १० पटलः ॥
"सत्ये तु सुन्दरी आद्या त्रेतायां भुवनेश्वरी ।
द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता ॥
नामभेदं प्रवक्ष्यामि रूपभेदं वरानने ।
न भेदः कालिकायाश्च ताराया जगदम्बिके ॥
षोड़श्या भुवनायाश्च भैरव्यास्त्रिपुरेश्वरि ।
छिन्नायाश्चैव धूमाया भीमायाः परमेश्वरि ॥
ततश्च वगलामुख्या मातङ्ग्याश्च सुरेश्वरि ।
न च भेदो महेशानि विद्याया वरवर्णिनि" ॥
आदिभूते त्रि ॥

आद्यूनः, त्रि, (आङ् पूर्व्वात् दीव्यतेरकर्म्मकत्वात् क्तः । दिवोविजिगीषायामिति निष्ठातस्य नत्वं यस्य विभाषेति नेट्, च्छोरित्यूट् ।) औदरिकः । इत्यमरः ॥ पेटुक इति भाषा । (यदुक्तं, अमरे ।
"आद्यूनः स्यादौदरिके विजिगीषाविवर्ज्जिते" ।
"आद्यूनः सदगृहिण्येव प्रायोयष्ट्यावलम्बितः" ॥
इति किराते ११ । ५ ।) आदिहीनः ॥

आद्योपान्तं, क्ली, (आद्यश्च उपान्तश्च द्वन्द्वः ।) पूर्व्वापरं । इस्तकनागादि इति भाषा ॥

आधमनं, क्ली, (आधीयते आङ् + धा + कमनन् ।) बन्धकं । इति स्मृतिः । (आधिः । यथा मनुः,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहं ।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ॥

आधानं, क्ली, (आधीयते आङ् + धा + भावे ल्युट् यद्वा आधीयते स्थाप्यते यत् कर्म्मणि ल्युट् ।) गर्भाधानं । अग्न्याधानं । स्थापितद्रव्यं । इति स्मृतिः ॥ (ग्रहणं, धारणं । अधिगमः, करणं । सम्पादनं । श्रौताग्नेः स्मार्त्ताग्नेर्वा ग्रहणं, ब्राह्मणानां प्रतिदिनकर्त्तव्या विहितवह्निस्थापनपूर्व्वकहोमादिक्रिया, यजनं, होमः । यथा रघुवंशे, १ । २४ ।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः" ॥
यथा मनुः, ५ । १६८ ।
"भार्य्यायै पूर्व्वमारिण्यै दत्वाग्नीनन्त्यकर्म्मणि ।
पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च" ॥
यथा महाभारते,—
"सर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा" ।
यथा मेघदूते, पूर्व्वमेघे । ३ ।
"तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः" ॥)

आधानिकं, क्ली, (आधानं गर्भाधानं प्रयोजनमस्य । प्रयोजनमिति ठक् ।) गर्भाधानसंस्कारः । इति त्रिकाण्डशेषः ॥

आधारः, पुं, (आध्रियन्ते अस्मिन् इति आधारः अध्यायन्यायेति सूत्रे अवहाराधारेत्युपसंख्यानादधिकरणे घञ् । व्याकरणशास्त्रे अधिकरणकारकं, तल्लक्षणं यथा सिद्धान्तकौमुद्यां, आधारोऽधिकरणं कर्तृकर्म्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात् । तच्च सामीप्यश्लेषविषयव्याप्तिभेदाच्चतुर्विधं । तथा सिद्धान्तकौमुद्यां, औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा यथा—कटे आस्ते । स्थाल्यां पचति । मोक्षे सर्व्वस्मिन्नात्मास्ति ।) अधिकरणं । आलवालं । अम्बुधारणं । इति मेदिनी ॥ क्षेत्रादिसेकार्थं सेतुना बद्धनालं जलं निरुध्य यत्र स्थाप्यते स आधारः बद्धकन्दरादिः । बाँध इति ख्यातः । इत्यमरटीकायां भरतः ॥ प्रस्थार्थं जलबन्धनमाधारः । इति वैकुण्ठः ॥ क्षेत्रादिसेकार्थं जलाधारस्थानमाधार इति मधुः ॥ (यथा रघुवंशे ५।६ ।
"आधारबन्धप्रमुखैः प्रयत्नैः
संवर्द्धितानां सुतनिर्व्विशेषं ।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम्" ॥
याज्ञवल्क्यः ।
"तथात्मकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्" ॥)

आधार्म्मिकः, त्रि, (अधर्म्म + ठञ् ।) अधार्म्मिकः । इति त्रिकाण्डशेषः ॥ (यथा मनुः ।
"नाधार्म्मिके वसेद्ग्रामे" ॥)

आधिः, पुं, (आङ् + धा + किः ।) मनःपीड़ा । प्रत्याशा । बन्धकं । व्यसनं । अधिष्ठानं । इति मेदिनी ॥
(यथा, हितोपदेशे ।
"आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ।
कोऽहि नाम शरीराय धर्म्मापेतं समाचरेत्" ॥
तथा च वैराग्यशतके ।
"आधिव्याधिशतैर्जनस्य
विविधैरारोग्यमुन्मूल्यते" ॥)

आधिक्यं, क्ली, (अधिक + ष्यञ् ।) अधिकस्य भावः । अधिकत्वं । अतिशयता । यथा ।
"युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं तथा ।
कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्" ॥
इति ज्योतिस्तत्त्वम् ॥ (श्रेष्ठता । उत्कर्षः । प्राबल्यम् । यथा साहित्यदर्पणे । १० मः ।
"आधिक्यमुपमेयस्योपमानात् न्यूनताथवा" ।
यथा, मनुः ७ । १६९ ।
"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" ॥
आधिक्यं नाम यदायुर्वेदे भाव्यमाने बार्हस्पत्यमौशनसम् अन्यदा प्रतिसम्बाधार्थमुच्यते यदा